# यिहूदाः पत्रं

I यीशुख्रीष्टस्य दासो याकूबो भ्राता यिहूदास्तातेनेश्वरेण
पवित्रीकृतान् यीशुख्रीष्टेन रक्षितांश्चाहूतान् लोकान् प्रति
पत्रं लिखति।
II कृपा शान्तिः प्रेम च बाहुल्यरूपेण युष्मास्वधितिष्ठतु।
III हे प्रियाः, साधारणपरित्राणमधि युष्मान् प्रति लेखितुं मम
बहुयत्ने जाते पूर्व्वकाले पवित्रलोकेषु समर्पितो यो धर्म्मस्तदर्थं
यूयं प्राणव्ययेनापि सचेष्टा भवतेति विनयार्थं युष्मान् प्रति
पत्रलेखनमावश्यकम् अमन्ये।
IV यस्माद् एतद्रूपदण्डप्राप्तये पूर्व्वं लिखिताः केचिज्जना
अस्मान् उपसृप्तवन्तः, ते ऽधार्म्मिकलोका अस्माकम्
ईश्वरस्यानुग्रहं ध्वजीकृत्य लम्पटताम् आचरन्ति, अद्वितीयो
ऽधिपति र्यो ऽस्माकं प्रभु र्यीशुख्रीष्टस्तं नाङ्गीकुर्व्वन्ति।
V तस्माद् यूयं पुरा यद् अवगतास्तत् पुन र्युष्मान् स्मारयितुम्
इच्छामि, फलतः प्रभुरेककृत्वः स्वप्रजा मिसरदेशाद् उदधार
यत् ततः परम् अविश्वासिनो व्यनाशयत्।
VI ये च स्वर्गदूताः स्वीयकर्तृत्वपदे न स्थित्वा स्ववासस्थानं
परित्यक्तवन्तस्तान् स महादिनस्य विचारार्थम् अन्धकारमये
ऽधःस्थाने सदास्थायिभि र्बन्धनैरबध्नात्।
VII अपरं सिदोमम् अमोरा तन्निकटस्थनगराणि चैतेषां
निवासिनस्तत्समरूपं व्यभिचारं कृतवन्तो विषममैथुनस्य चेष्टया
विपथं गतवन्तश्च तस्मात् तान्यपि दृष्टान्तस्वरूपाणि भूत्वा
सदातनवह्निना दण्डं भुञ्जते।
VIII तथैवेमे स्वप्नाचारिणोऽपि स्वशरीराणि कलङ्कयन्ति
राजाधीनतां न स्वीकुर्व्वन्त्युच्चपदस्थान् निन्दन्ति च।

IX किन्तु प्रधानदिव्यदूतो मीखायेलो यदा मूससो देहे
शयतानेन विवदमानः समभाषत तदा तिस्मन् निन्दारूपं दण्डं
समर्पयितुं साहसं न कृत्वाकथयत् प्रभुस्त्वां भर्त्सयतां।
X किन्त्विमे यन्न बुध्यन्ते तन्निन्दन्ति यच्च निर्ब्बोधपशव
इवेन्द्रियैरवगच्छन्ति तेन नश्यन्ति।
XI तान् धिक्, ते काबिलो मार्गे चरन्ति पारितोषिकस्याशातो
बिलियमो भ्रान्तिमनुधावन्ति कोरहस्य दुर्म्मुखत्वेन विनश्यन्ति
च।
XII युष्माकं प्रेमभोज्येषु ते विघ्नजनका भवन्ति,
आत्मम्भरयश्च भूत्वा निर्लज्जया युष्माभिः सार्द्धं भुञ्जते।
ते वायुभिश्चालिता निस्तोयमेघा हेमन्तकालिका निष्फला द्वि
र्मृता उन्मूलिता वृक्षाः,
XIII स्वकीयलज्जाफेणोद्वमकाः प्रचण्डाः सामुद्रतरङ्गाः
सदाकालं यावत् घोरतिमिरभागीनि भ्रमणकारीणि नक्षत्राणि च
भवन्ति।
XIV आदमतः सप्तमः पुरुषो यो हनोकः स तानुद्दिश्य
भविष्यद्वाक्यमिदं कथितवान्, यथा, पश्य स्वकीयपुण्यानाम्
अयुतै र्वेष्टितः प्रभुः।
XV सर्व्वान् प्रति विचाराज्ञासाधनायागमिष्यति। तदा
चाधार्म्मिकाः सर्व्वे जाता यैरपराधिनः। विधर्म्मकर्म्मणां तेषां
सर्व्वेषामेव कारणात्। तथा तद्वैपरीत्येनाप्यधर्म्माचारिपापिनां।
उक्तकठोरवाक्यानां सर्व्वेषामपि कारणात्। परमेशेन दोषित्वं
तेषां प्रकाशयिष्यते॥
XVI ते वाक्कलहकारिणः स्वभाग्यनिन्दकाः स्वेच्छाचारिणो
दर्पवादिमुखविशिष्टा लाभार्थं मनुष्यस्तावकाश्च सन्ति।
XVII किन्तु हे प्रियतमाः, अस्माकं प्रभो र्यीशुख्रीष्टस्य
प्रेरितै र्यद् वाक्यं पूर्व्वं युष्मभ्यं कथितं तत् स्मरत,
XVIII फलतः शेषसमये स्वेच्छातो ऽधर्म्माचारिणो निन्दका
उपस्थास्यन्तीति।

XIX एते लोकाः स्वान् पृथक् कुर्व्वन्तः सांसारिका
आत्महीनाश्च सन्ति।
XX किन्तु हे प्रियतमाः, यूयं स्वेषाम् अतिपवित्रविश्वासे
निचीयमानाः पवित्रेणात्मना प्रार्थनां कुर्व्वन्त
XXI ईश्वरस्य प्रेम्ना स्वान् रक्षत, अनन्तजीवनाय चास्माकं
प्रभो र्यीशुख्रीष्टस्य कृपां प्रतीक्षध्वं।
XXII अपरं यूयं विविच्य कांश्चिद् अनुकम्पध्वं
XXIII कांश्चिद् अग्नित उद्धृत्य भयं प्रदर्श्य रक्षत,
शारीरिकभावेन कलङ्कितं वस्त्रमपि ऋतीयध्वं।
XXIV अपरञ्च युष्मान् स्खलनाद् रक्षितुम् उल्लासेन
स्वीयतेजसः साक्षात् निर्द्दोषान् स्थापयितुञ्च समर्थो
XXV यो ऽस्माकम् अद्वितीयस्त्राणकर्त्ता सर्व्वज्ञ ईश्वरस्तस्य
गौरवं महिमा पराक्रमः कर्तृत्वञ्चेदानीम् अनन्तकालं यावद्
भूयात्। आमेन्।

# Sanskrit Bible (NT) in Devanagari Script (सत्यवेदः।)

## New Testament in Sanskrit Language; printed in Devanagari Script

copyright © 2018 SanskritBible.in

Language: Sanskrit

Contributor: SanskritBible.in

Thank you for your interest in Sanskrit Bible.
Sanskrit Bible (NT) is freely available in 22 different scripts of your choice. This edition is in Devanagari script and is based on the Sanskrit translation of the Holy Bible published by Calcutta Baptist Missionaries in 1851. Please visit SanskritBible.in to learn more about Sanskrit Bible and to download various free Christian literature.

This translation is made available to you under the terms of the Creative Commons Attribution Share-Alike license 4.0.
You have permission to share and redistribute this Bible translation in any format and to make reasonable revisions and adaptations of this translation, provided that:

- You include the above copyright and source information.
- If you make any changes to the text, you must indicate that you did so in a way that makes it clear that the original licensor is not necessarily endorsing your changes.
- If you redistribute this text, you must distribute your contributions under the same license as the original.

Pictures included with Scriptures and other documents on this site are licensed just for use with those Scriptures and documents. For other uses, please contact the respective copyright owners.

Note that in addition to the rules above, revising and adapting God's Word involves a great responsibility to be true to God's Word. See Revelation 22:18-19.

2020-01-01

---

PDF generated using Haiola and XeLaTeX on 22 Feb 2024 from source files dated 29 Jan 2022
b86351f0-254a-576d-aa84-ea19df4455cb